# मपर्यन्तस्य इति अधिकारसूत्रविचारः

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

1.अधिकारलक्षणम्

2.सूत्रप्रयोजनम्

3.सूत्रार्थः

4.युष्मदस्मच्छब्दनिष्पत्तिः

5.ङे प्रथमयोरित्यत्र कयोरितिविचारः

6.त्वं स्त्री, अहं स्त्रीत्यत्र टबभावसाधनम्

7.अलिङ्गे युषम्दस्मदीति निरूपणम्

8.यूयम्, वयमित्यत्र शीभावः कुतो न

8.शेखारकारमतनिरूपणम्

9.मपर्यन्तस्य इत्यधिकारसूत्रावश्यकता

**प्रस्तावः**

इदं सूत्रमष्टाध्याय्यां सप्तमाध्याये द्वितीये पादे एकनवतितमं सूत्रम्। युष्मदस्मच्छब्दप्रक्रियानिरूपणावसरे इदं सूत्रं वर्तते। अधिकारसूत्रमिदम्। अधिकारो नाम स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति स्वोत्तरवर्तिविधिशास्त्रैकवाक्यतापन्नत्वम्।

**मपर्यन्तस्येति सूत्रार्थः**

अस्मिन्नधिकारे ये ये आदेशाः प्रोक्ताः ते सर्वेऽपि मपर्यन्तस्यैव अर्थात् युष्म्, अस्म् इति मान्तस्यैव भवन्तीत्यर्थः।अस्मिन्नधिकारे एवं सूत्रक्रमः दरीदृश्यते।

| सूत्रम् | अध्यायः | पादः | सूत्रसंख्या |
|---|---|---|---|
| 1.मपर्यन्तस्य | 7 | 2 | 91 |
| 2.त्वाहौ सौ | 7 | 2 | 94 |
| 3.शेषे लोपः | 7 | 2 | 90 |

| | | | |
|---|---|---|---|
| 4.युवावौ द्विवचने | 7 | 2 | 92 |
| 5.प्रथमायाश्चद्विवचने भाषायाम् | 7 | 2 | 88 |
| 6.यूयवयौ जसि | 7 | 2 | 93 |
| 7.त्वमावेकवचने | 7 | 2 | 97 |
| 8.द्वितीयायां च | 7 | 2 | 87 |
| 9.शसो न | 7 | 2 | 29 |
| 10.योऽचि | 7 | 2 | 89 |
| 11.युष्मदस्मदोरनादेशे | 7 | 2 | 86 |
| 12.तुभ्यमह्यौ ङयि | 7 | 2 | 95 |
| 13.भ्यसो भ्यम् | 7 | 1 | 30 |

**युष्मदस्मच्छब्दनिष्पत्तिः**

युष् इति सौत्रो धातुः। योषति = सेवते इति, अस्यति = प्रक्षिपत्यर्थमिति विग्रहे **युष्यसिभ्यां मदिक्**7-1-28इत्युणादिसूत्रेण मदिक्प्रत्यये कित्त्वाद्गुणाभावे युष्मद्,अस्मद् इति रूपे निष्पन्ने। ततः युष्मच्छब्दात् प्रथमैकवचने सुप्रत्यये, तथा अस्मच्छब्दात् प्रथमैकवचने सुप्रत्यये च कृते युष्मद्+सु, अस्मद्+सु इति स्थिते **ङेप्रथमयोरम्**7-2-94इति सूत्रेण सोः अमादेशे युष्मद्+अम्, अस्मद्+अम् इति जाते **त्वाहौसौ** इति सूत्रेण मपर्यन्तस्य त्वाहावादेशौ त्व+अद्+अम्, अह+अद्+अम् इति जाते **शेषेलोपः**7-2-90(**आत्वयत्वनिमित्तेतरविभक्तौ परतः युष्मदस्मदोरन्त्यस्य लोपः स्यात्**) इति सूत्रेण युष्मदस्मदोः अन्त्यस्य दस्य लोपे त्व+अ+अम्, अह+अ+अम् इति जाते **अतो गुणे**6-1-97इति सूत्रेण उभयत्रापि पररूपे त्व+अम्, अह+अम् इति जाते **प्रथमयोः पूर्वसवर्णः**6-1-102इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य **अमिपूर्वः** इति सूत्रेण पूर्वरूपे त्वम्, अहम् इत्यभीष्टरूपे सिध्यतः।

**ङेप्रथमयोः इत्यत्र प्रथमयोः इत्यनेन कयोः प्रथमयोः ग्रहणमिति विचारः**

अत्र **ङेप्रथमयोरम्** इति सूत्रेण अमादेशः सोः कृतः। प्रकृते प्रथमयोः इत्यनेन कयोः प्रथमयोः= विभक्त्योः, आहोस्वित् प्रत्यययोः ग्रहणं भवतीति चेद् - उच्यते अत्र प्रथमापदं प्रथमाद्वितीयारूपसुब्विभक्तिसमुदाये लाक्षणिकम्। उद्भूतावयवभेदविवक्षया प्रथमयोः इति द्विवचनम्। अत्र च

भाष्यमेव मानम्। अत्रहि भाष्यम्-कयोरिदं प्रथमयोर्ग्रहणम्? किं विभक्त्योराहोस्वित्प्रत्यययोः। विभक्त्योरित्याह इति, यत्तर्हि युष्मदस्मदोरनादेशे, द्वितीयायाञ्चेत्याह–तज्ज्ञापयत्याचार्योविभक्त्योर्ग्रहणमितिइति च

**अयमर्थः**

प्रथमयोः इत्यनेन प्रथमाद्वितीयाविभक्त्योर्ग्रहणम् इत्यत्र**द्वितीयायाञ्च**7-2-87इति सूत्रमेव ज्ञापकम्। तद्धि द्वितीयायाः अमादेशे**युष्मदस्मदोरनादेशे** इत्यात्वाप्राप्त्या आदेशेऽपि आत्वार्थम्। वस्तुतः आलोच्यमाने प्रत्यययोः ग्रहणे आदेशाभावेन युष्मदस्मदोः इत्येवात्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। तथा च प्रथमयोः इत्यनेन विभक्त्योरेवग्रहणम् इति फलति।ङे इत्यविभक्तिकोयं निर्देशः। सपां सुलुक् इति षष्ठ्या लुक्। प्रथमयोरिति षष्ठीद्विवचनान्तम्- प्रथमा च प्रथमा च प्रथमे, तयोः प्रथमयोः। षष्ठीनिर्देशस्योभयत्र तुल्यत्वात् प्रथमयोः प्रत्यययोः स्वौकारयोर्ग्रहणमिति कस्यचिद् भ्रान्तिः स्याद्, अतः तां निराकर्तुमाह – विभक्त्योर्ग्रहणमितिपदमञ्जरी।

**त्वं स्त्री, अहं स्त्री इत्यत्र टाप् कुतो नेति विचारः**

त्व +अ+ अम्, अह +अ + अम् इत्यवस्थायां पररूपादन्तरङ्गत्वात् टाप् कुतो न भवतीति चेद् उच्यते- टापः अपरनिमित्तकत्वेन अन्तरङ्गत्वाट्टाप्प्राप्नोति=अपरनिमित्तकत्वात्, अथापि टाब्न भवति। कुत इति चेद् - अलिङ्गे युष्मदस्मदी, तेन स्त्रीत्वाभावान्न टाप्। तथा च युष्मदस्मदोः लिङ्गान्तराभावात् न टाप् इति फलितम्।

**अलिङ्गे युष्मदस्मदी इति निरूपणम्**

अलिङ्गे युष्मदस्मदी इति तु अयुक्तं खलु इति पुनः पर्यनुयुङ्क्ते। तथाहि- ङेप्रथमयोः इति सूत्रे भाष्ये आचार्यप्रवृत्तिर्ज्ञापयति-विभक्त्योर्ग्रहणमिति। यदयं शसो न इति इति प्रतिषेधं शास्ति। नैषप्रतिषेधः। नत्वमेतद्विधीयते। सिद्धमत्र नत्वम्, युष्मान् ब्राह्मणान् पश्य, अस्मान् ब्राह्मणान् पश्य तस्मच्छसोः नः पुंसीति। यत्र तेन न सिध्यति तदर्थम्। क्व तेन न सिध्यति। स्त्रियां नपंसके च युष्मान् ब्राह्मणीःपश्य, अस्मान् ब्राह्मणीः पश्य, युष्मान् ब्राह्मणकुलानि पश्य, अस्मान् ब्राह्मणकुलानि पश्येति इत्युक्तम्। अनेन स्पष्टं ज्ञायते युष्मदस्मदोः लिङ्गत्रययोगः वर्तत इति।

तथा **नेतराच्छन्दसि** इति सूत्रे भाष्ये च **नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन, त्वं ब्राह्मणकुलम्। अहं ब्राह्मणकुलम्।युवां ब्राह्मणकुले। आवां ब्राह्मणकुले। यूयं ब्राह्मणकुलानि। वयं ब्राह्मणकुलानि इति**। यदि युष्मदस्मदोः लिङ्गाभावस्तदा तद्भाष्यं विरुध्येत। तस्माद् अवश्यं युष्मदस्मदोः सलिङ्गकत्वं स्वीकर्तव्यमेव। परन्तु **साम आकम्** इत्यत्र अलिङ्गे युष्मदस्मदी इति भाष्यविरोधः खलु इति चेत् तद्भाष्यस्य अर्थवर्णनमेवं कर्तव्यम्- लिङ्गबोधसूचकपदान्तरसमभिव्याहारोनास्तीति। तथाच युष्मदस्मदोरपि सलिङ्गकत्वात्

स्त्रीत्वात् टाप्प्राप्नोत्येव इत्यस्वरसादेव द्वितीयं समाधानमुक्तं कौमुद्यां यद्वा शेष इति सप्तमी स्थानिनोऽधिकरणत्वविक्षया इत्यादिना।

**अत्र शेखरकारमतम्**

शेखरकारमते तावत् प्रकृते टापः प्राप्तिरेव नास्ति। तन्मते त्वाहादयः आदेशा हलन्ता एव। अतः टाप् न प्राप्नोति। एतावता अत्र सूक्ष्मदृष्ट्या परिशील्यमान आदेशा अजन्ताः कौमुदीकारमते, हलन्ताः शेखरकारमत इति पक्षद्वयमत्र। यद्येवं आदेशानां हलन्तत्वपक्षे त्वाहौ सौ, तवममौ इत्यादिनिर्दिशौ न सङ्गच्छेते इति तु नाशङ्कनीयम्। त्यदादीनामः इति सूत्रभाष्यकैयटाभ्यां हलन्ता एवादेशा इति लभ्यते, तदा पररूपस्य प्राप्तिरेव न। तवाद्यादेशानामदन्तत्वे वार्णादाङ्गस्य बलीयस्त्वात्पररूपं बाधित्वा टिलोपे पाप्रसङ्गस्तदवस्थ एवेत्याशयेन तद्वारणाय तद्व्यख्यानावसरे तवादिषु **चादेशेष्वकार उच्चारणार्थौ हलन्ता एवादेशा** इति न क्वचिट्टाप्प्रसङ्गः इति कैयटेनोक्तम्। तस्मात् प्रकृतभाष्यकैयटाभ्यां आदेशाः हलन्ताः इति स्फुटं लभ्यते। यद्यप्युच्चारणार्थानामपि इत्संज्ञालोपाभ्यां निवृत्तिः कार्या, तथापि अतो गुणे इत्यस्याप्रवर्तनेन प्रक्रियालाघवमत्रपक्षे। अकारस्य विवक्षितत्वे अतो गुणे इत्येकस्यैव शास्त्रस्य प्रवृत्तिः। अकारस्याविवक्षितत्वे तु इत्संज्ञालोपविधायकशास्त्रद्वयस्य प्रवृत्तिरिति उच्चारणार्थत्वे एव गौरवमित्यपि नाशङ्कनीयम्। पररूपशास्त्रेणानन्तप्रयोगाणां साधुत्वप्रतिपादनापेक्षया सूत्रे शास्त्रद्वयप्रवृत्तौ न गौरवं, किन्तु ततो लाघवमेव। त्वाहौ सौ इति गुरुनिर्देशस्तु **मन्त्रे श्वेतवहोक्थशस्** इति सूत्रे श्वेतवहुक्थशसित्येव वाच्ये उच्चारणार्थकाकारेण गुरुनिर्देशो नार्थसाधकः, एवयमपि न अदन्तादेशत्वसाधक इति निगूढार्थः।

**युवाम्,आवाम्- इत्यनयोःप्रक्रिया**

युष्मदस्मच्छब्दाभ्यां प्रथमाद्विवचने औप्रत्यये युष्मद्+औ, अस्मद्+औ इति स्थिते अमादेशे, **युवावौ द्विवचने** इति सूत्रेण मपर्यन्तयोः युष्मदस्मदोः युव-आव-इत्यादेशौ युव+अद्+अम्, आव+अद्+अम् इति जाते शेषे लोपः इति सूत्रेण लोपे प्राप्ते **प्रथमायाश्च द्विवचने भाषायाम्** इति सूत्रेण दस्य आत्वे युव+अ+आ+अम्, आव+अ+आ+अम् इति जाते पूर्वयोः अकारयोः सवर्णदीर्घे युव+आ+अम्, आव+आ+अम् इति जाते अमिपूर्वः इति पूर्वरूपे युवाम् आवाम् इति रूपे सिध्यतः।

**यूयम्,वयम्- प्रक्रिया**

युष्मदस्मच्छाब्दाभ्यां प्रथमाबहुवचने जसि युष्मद्+जस्, अस्मद्+जस् इति स्थिते अमादेशे, युष्मदस्मदोः मर्यन्तस्य **यूयवयौ जसि** इति सूत्रेण यूय-वयादेशौ, यूय+अद्+अम् वय+अद्+अम् इति जाते शेषे लोपः इति सूत्रेण टिलोपे अदः लोपे यूयम् वयम् इत्यभीष्टरूपे भवतः।शेषे लोपः इत्यत्र टिलोपः इति एकःपक्षः,

अन्त्यलोपः इति द्वितीयः पक्षः। सतोः द्वयोः पक्षयोः प्रकृते कतरः पक्षः समाश्रयणीयः इति चेत्, प्रकृते अन्त्यलोपपक्ष एव समाश्रीयते। तदा यूयम्, वयम् इत्यत्र जसः शी कुतो न भवतीति चेत्-

**अत्र कौमुदीकाररीत्या समाधानम्**

अङ्गवृत्तपरिभाषया न भवति। तथाहि- अङ्गवृत्तेपुनर्वृत्तावविधिः इति परिभाषास्वरूपम्। सकृद् अङ्गकार्यप्रवृत्तौ सत्यां पुनः अन्यस्य अङ्गकार्यस्य प्रवृत्तिः न भवतीति परिभाषार्थः। प्रकृते शेषेलोपः अङ्गाधिकारस्थः। तस्य प्रवृत्तौ सत्यां पुनः अन्यस्य अङ्गाधिकारीयस्य शीभावस्य प्रवृत्तिः न भवति। अतो न दोषः। एषा परिभाषा **किं यत्तदोर्निर्धारणे द्वयोरेकस्य निर्धारणे डतरच्** इत्यत्र द्वयोः इति निर्देशेन अनित्या। वस्तुतः आलोच्यमाने इयं परिभाषा अत्र न प्रवर्तते, कुत इति चेत् शीभावस्य अङ्गाधिकारविहितत्वेऽपि अङ्गाधिकरणकत्वाभावात्। अतः यूयमित्यत्र शीभावो दुर्वार इति चेत् समाधानान्तरमुक्तं मूले-ङेप्रथमयोः इत्यत्र मकारान्तरं प्रश्लिष्य अम् मान्त एवावशिष्यते, न तु विक्रियतइति व्याख्यानाद्वा इति।

**अयमर्थः---ङेप्रथमयोरम्** इत्यत्र मकारान्तरं प्रश्लिष्यते। अम् च म् चेति द्वन्द्वः। अम्-म् इत्यत्र विशेषणसमासे मस्य प्रथमानिर्दिष्टत्वेन पूर्वनिपातापत्तिः। असमासे संयोगान्तलोपाप्राप्तौ मद्वयश्रवणापत्तिरिति नाशङ्कनीयम्।ङेप्रथमयोरम्म्, शसो न इति संहितापाठे **न व्यञ्जनपरस्य अनेकस्य एकस्य वा उच्चारणे विशेषोऽस्ति** इति न्यायेन मद्वयोच्चारणेऽपि एकमकारोच्चारणाविशेषात्, **वर्णग्रहणे जातिग्रहणम्** इति न्यायेन मद्वये मत्वारोपेण अनुस्वाराद्वा।अन्त्यः मकारः संयोगान्तलोपेन लुप्तः। प्रश्लिष्टश्च मकारः अमः विशेषणम्, तदन्तविधिः। मकारान्तः अम् स्यादिति लभ्यते। अमः मकारान्तस्य पुनर्मान्तत्वविधानाद् अम् मान्त एव भवति। न तु तस्य विकारो भवतीति लभ्यते, अतश्शीभावो न भवतीति भावः।

**अत्र शेखरकारमतम्**

ङेप्रथमयोरम् इत्यत्र मकारप्रश्लेषोभाष्ये क्वापि न दृष्टः। अतस्सन्निपातपरिभाषया शीभवोवारणीयो यूयमित्यादिषु। शेषविभक्तिभूत-अमादियुष्मदस्मदादिसन्निपातेन जातस्य लोपस्य सन्निपातविघातक श्यादेशनिमित्तं न भवतीति सन्निपातपरिभाषयैव शीभावाऽप्रवृत्तिः।

**1.मपर्यन्तस्य इति अधिकारसूत्रमावश्यकं न वेति विचारः**

मपर्यन्तस्य इति सम्पूर्णसूत्रं मास्तु। तदभावेऽपि अभीष्टरूपाणि सिध्यन्तीति पूर्वपक्षाशयः। मपर्यन्तस्य इत्यवयवस्य स्थानित्वेन निर्देशात् युष्मदस्मदोः इत्यवयवषष्ठी प्रतीयते। मः पर्यन्तः अवधिःयस्य सः =मपर्यन्तः, तस्य मपर्यन्तस्य। यद्यपि द्वयोः शब्दयोः द्वौ मपर्यन्तौ इति मपर्यन्तयोः इति वक्तव्यं तथापि द्वयोरवयवयोरभेदविवक्षया मपर्यन्तस्य इत्येकवचननिर्देशः। तथा च सम्पूर्णसूत्राभावे सम्पूर्णयोः तयोः युवावादेशयोः कृतयोः आदेशाकारयोरात्वे अमिपूर्वरूपे च युवाम्, आवाम् इत्यस्य च सिद्धिरिति पूर्वपक्षाशयः।

**1-1पूर्वक्षस्य समाधानम्**

साकच्कस्य माभूत्, युवकाम्,आवकाम् इति । तस्यायमर्थः - मपर्यन्तस्येति सम्पूर्णसूत्राभावे युवकाम्,आवकाम् इत्यत्र ककारो न श्रूयेत। तथाहि- **अव्ययसर्वनाम्नामकच्प्राक्टेः** इत्यधिकृत्य **अज्ञाते** इत्यनेन अव्ययादिभ्यः अज्ञातेऽर्थे अकच् भवति, स च टेः प्राक् इति युष्मदस्मदोः सर्वनाम्नष्टेः प्रागकचि युष्मकद्+औ, अस्मकद्+औ इति स्थिते अमादेशे तन्मध्यपतितन्यायेन अकज्विशिष्टयोः तयोः युष्मदस्मद्ग्रहणेन ग्रहणात् साकच्कयोः युष्मकद्-अस्मकच्छब्दयोः युवावादेशयोः कृतयोः**प्रथमायाश्च द्विवचने भाषायाम्** इत्यनेन आत्वे युवाम्,आवाम् इत्येव स्यात्, इष्यते च युवकाम्, आवकाम् इति। अतः मपर्यन्तस्य इति सूत्रमावश्यकम्। तत्सत्त्वे तु मपर्यन्तयोः युष्मदस्मदोः युवावादेशयोः कृतयोः युवकाम्,आवकाम् इत्यत्र ककारश्रवणं भवति। तस्मात् सूत्रमावश्यकम्।

**2.युवकाम्,आवकाम् इत्यत्र अकच्श्रवणार्थं सूत्रं नारम्भणीयमिति पनः पूर्वपक्षः**

युवावयोः समुदायादेशत्वेऽपि **ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र सुबन्तस्य टेः प्राक्**इति वार्तिकं तद्धितेषु पठितम्। अतः मपर्यन्तस्येति सूत्राभावेऽपि युवाम्,आवाम् इति परिनिष्ठितसुबन्तस्य टेः प्रागकचि कृते सति युवकाम्,आवकाम् इत्यत्र अकच्श्रवणं भवतीति कृत्वा सूत्रं नारम्भणीयमिति पूर्वपक्षाशयः। तस्मात् सूत्रं नावश्यकम्।

**3. मपर्यन्तस्येति सूत्राभावे त्वया, म्या इति अनिष्टे रूपे स्याताम्**

अयमर्थः- मपर्यन्तस्येति सूत्राभावे त्वया, मया इत्यत्र **त्वमावेकवचने** इति सूत्रविहितौ त्वमादेशौ सर्वयोः युष्मदस्मदोः स्थाने स्याताम्। तथाहि- तृतीयैकवचने युष्मद्+आ, अस्मद्+आ इति स्थिते युष्मदस्मदोःस्थाने त्वमादेशयोः त्व+आ, म+आ इति स्थिते **योऽचि** इति सूत्रेणअकारस्य यत्वे त्व्या,म्या इति अनिष्टरूपे स्याताम्। अतः मपर्यन्तस्येति अधिकारवचनमावश्यकम्। तत्सत्त्वे तु मपर्यन्तस्य त्वमादेशयोः कृतयोः त्व+अद्+आ, म+अद्+आ इति स्थिते अकारयोः पररूपे दस्य यत्वे च त्वया, मया इत्यभीष्टरूपे सिध्यतः। तस्मात् सूत्रमावश्यकम्।

**4. त्वया,मया इत्यभीष्टरूपसाधनार्थं योऽचि इति सूत्रं नावश्यकमिति पूर्वपक्षः**

पूर्वपक्षस्यायमर्थः- योऽचि इति सूत्रस्थाने अच्ये इति सूत्रमस्तु। अजादिविभक्तौ परतः युष्मदस्मदोरन्त्यस्य एकारः स्यादिति सूत्रार्थः स्यात्।तथाच त्वमयोः सम्पूर्णयुष्मदस्मत्स्थानिकत्वेऽपि तदन्त्यस्य अकारस्य एत्वे अयादेशे च कृते त्वया, मया इति सिध्यतःखलु, तदर्थं सूत्रमनावश्यकमिति भावः।

**5. असति मपर्यन्तस्येति सूत्रे युवकाभ्याम्,आवकाभ्यामिति न सिध्येद् इति सिद्धान्तिसमाधानम्**

अयमर्थः- असति सूत्रे **ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र सुबन्तस्य टेः प्राक्** इति वार्तिकेन भ्यामि टेः प्रागकचि तन्मध्यपतितन्यायेन साकच्कयोः स्थाने युवावादेशयोः युवाभ्याम्,आवाभ्याम् इत्येव स्यात्, ककारो न श्रूयेत। सूत्रसत्त्वे तु युष्मकद्, अस्मकद् इत्यत्र मपर्यन्तस्यैव युवावादेशयोः, आत्वे च युवकाभ्याम्, आवकाभ्याम् इत्यत्र ककारः श्रूयते। तस्मान्मपर्यन्तस्येति अधिकारसूत्रमावश्यकमेव।

**6.मपर्यन्तस्य इति सूत्रमावश्यकं चेत् तत्स्थाने मान्तस्य इत्येवोच्यताम्, किं पर्यन्तग्रहणेनेति पूर्वपक्षः**

मान्तस्य इत्येव सूत्रसत्त्वेऽपि पूर्वोक्तानि अभीष्टरूपाणि सिध्यन्ति खलु, अतः मात्रालाघवात् मान्तस्यैवोच्यताम् इति पूर्वपक्षाशयः।

**6-1अत्र शेखरकाराणामाशयः**

यदि मान्तस्य इत्येव सूत्रं स्यात् युष्मयत्यादेः क्विपि (युष्मानिव आचरति इत्यर्थे) टिलोपे, युष्म् इति जाते सुपि आदेशवारणार्थं परिग्रहणमावश्यकम्। पर्यन्तशब्देन मान्तापेक्षया शेषस्य लाभः। कटिपर्यन्तं वासः इत्युक्ते अग्रे किञ्चिदस्तीति नियमेन प्रतीतिः भवति। एवञ्च मान्तापेक्षया यत्र अग्रे किञ्चिदवशिष्टं तत्रैव युष्मदस्मदोः आदेशाः भवन्ति। अतएव भाष्ये **अवधिद्योतनार्थं परिग्रहणं कर्तव्यम्, मान्तस्य इत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः। क्व च मान्ते? युष्मयतेरस्मयतेश्च अप्रत्यये इति उक्तम्** ।मान्तापेक्षया यत्र अग्रे किञ्चिदवशिष्टं तत्रैव आदेशाः स्युः।अवधिद्योतनार्थमित्यस्य अन्तशब्दस्य अवधिवाचकतयाद्योतनार्थमित्यर्थः, पर्यन्तशब्दस्य लोके तथैव प्रयोगदर्शनात्। अग्रे किञ्चित्सत्त्वे एवदेशकालयोः अवधिव्यवहारस्य लोके दर्शनाच्च। परिग्रहणाभावे तु **यतः पूर्वोऽस्ति परश्च नास्ति सोऽन्त्यः**इति भाष्योक्तेः मान्तपदस्य मुख्यार्थत्वलाभाय**युष्मयतेरस्मयतेश्च अप्रत्यये एव** स्यात्। तस्मात् सम्पूर्णसूत्रमावश्यकमेवेति शेखरकाराणामाशयः।।